# shrIgovindadAmodarastotra

# શ્રીગોવિન્દદામોદરસ્તોત્ર

## Document Information

Text title : govindadAmodara mAdhaveti stotraM

File name : govind.itx

Category : vishhnu, krishna, stotra, vishnu

Location : doc_vishhnu

Author : bilvamangalAchArya

Transliterated by : Damodar Godse - dgodse at aracnet.net

Proofread by : Damodar Godse - dgodse at aracnet.net

Latest update : June 16, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 12, 2021

*sanskritdocuments.org*

# શ્રીગોવિન્દદામોદરસ્તોત્ર

અગ્રે કુરૂણામથ પાણ્ડવાનાં દુઃશાસનેનાહૃતવસ્ત્રકેશા ।
કૃષ્ણા તદાક્રોશદનન્યનાથા ગોવિન્દ દામોદર માધવેતિ ॥ ૧॥

શ્રીકૃષ્ણ વિષ્ણો મધુકૈટભારે ભક્તાનુકમ્પિન્ ભગવન્ મુરારે ।
ત્રાયસ્વ માં કેશવ લોકનાથ ગોવિન્દ દામોદર માધવેતિ ॥ ૨॥

વિક્રેતુકામા કિલ ગોપકન્યા મુરારિપાદાર્પિતચિત્તવૃત્તિઃ ।
દધ્યાદિકં મોહવશાદવોચદ્ ગોવિન્દ દામોદર માધવેતિ ॥ ૩॥

ઉલૂખલે સમ્ભૃતતણ્ડુલાંશ્ચ સઙ્ઘટ્ટયન્ત્યો મુસલૈઃ પ્રમુગ્ધાઃ ।
ગાયન્તિ ગોપ્યો જનિતાનુરાગા ગોવિન્દ દામોદર માધવેતિ ॥ ૪॥

કાચિત્કરામ્ભોજપુટે નિષણ્ણં ક્રીડાશુકં કિંશુકરક્તતુણ્ડમ્ ।
અધ્યાપયામાસ સરોરુહાક્ષી ગોવિન્દ દામોદર માધવેતિ ॥ ૫॥

ગૃહે ગૃહે ગોપવધૂસમૂહઃ પ્રતિક્ષણં પિઞ્જરસારિકાણામ્ ।
સ્ખલદ્ગિરાં વાચયિતું પ્રવૃત્તો ગોવિન્દ દામોદર માધવેતિ ॥ ૬॥

પર્યઙ્કિકાભાજમલં કુમારં પ્રસ્વાપયન્ત્યોઽખિલગોપકન્યાઃ ।
જગુઃ પ્રબન્ધં સ્વરતાલબન્ધં ગોવિન્દ દામોદર માધવેતિ ॥ ૭॥

રામાનુજં વીક્ષણકેલિલોલં ગોપી ગૃહીત્વા નવનીતગોલમ્ ।
આબાલકં બાલકમાજુહાવ ગોવિન્દ દામોદર માધવેતિ ॥ ૮॥

વિચિત્રવર્ણાભરણાભિરામેઽભિધેહિ વક્ત્રામ્બુજરાજહંસિ ।
સદા મદીયે રસનેઽગ્રરઙ્ગે ગોવિન્દ દામોદર માધવેતિ ॥ ૯॥

અઙ્કાધિરૂઢં શિશુગોપગૂઢં સ્તનં ધયન્તં કમલૈકકાન્તમ્ ।
સમ્બોધયામાસ મુદા યશોદા ગોવિન્દ દામોદર માધવેતિ ॥ ૧૦॥

ક્રીડન્તમન્તર્વ્રજમાત્મજં સ્વં સમં વયસ્યૈઃ પશુપાલબાલૈઃ ।
પ્રેમ્ણા યશોદા પ્રજુહાવ કૃષ્ણં ગોવિન્દ દામોદર માધવેતિ ॥ ૧૧॥

યશોદયા ગાઢમુલૂખલેન ગોકણ્ઠપાશેન નિબધ્યમાનઃ ।
રુરોદ મન્દં નવનીતભોજી ગોવિન્દ દામોદર માધવેતિ ॥ ૧૨॥

નિજાઙ્ગણે કઙ્કણકેલિલોલં ગોપી ગૃહીત્વા નવનીતગોલમ્ ।
આમર્દયત્પાણિતલેન નેત્રે ગોવિન્દ દામોદર માધવેતિ ॥ ૧૩॥

ગૃહે ગૃહે ગોપવધૂકદમ્બાઃ સર્વે મિલિત્વા સમવાયયોગે ।
પુણ્યાનિ નામાનિ પઠન્તિ નિત્યં ગોવિન્દ દામોદર માધવેતિ ॥ ૧૪॥

મન્દારમૂલે વદનાભિરામં બિમ્બાધરે પૂરિતવેણુનાદમ્ ।
ગોગોપગોપીજનમધ્યસંસ્થં ગોવિન્દ દામોદર માધવેતિ ॥ ૧૫॥

ઉત્થાય ગોપ્યોઽપરરાત્રભાગે સ્મૃત્વા યશોદાસુતબાલકેલિમ્ ।
ગાયન્તિ પ્રોચ્ચૈર્દધિ મન્થયન્ત્યો ગોવિન્દ દામોદર માધવેતિ ॥ ૧૬॥

જગ્ધોઽથ દત્તો નવનીતપિણ્ડો ગૃહે યશોદા વિચિકિત્સયન્તી ।
ઉવાચ સત્યં વદ હે મુરારે ગોવિન્દ દામોદર માધવેતિ ॥ ૧૭॥

અભ્યર્ચ્ય ગેહં યુવતિઃ પ્રવૃદ્ધપ્રેમપ્રવાહા દધિ નિર્મમન્થ ।
ગાયન્તિ ગોપ્યોઽથ સખીસમેતા ગોવિન્દ દામોદર માધવેતિ ॥ ૧૮॥

ક્વચિત્ પ્રભાતે દધિપૂર્ણપાત્રે નિક્ષિપ્ય મન્થં યુવતી મુકુન્દમ્ ।
આલોક્ય ગાનં વિવિધં કરોતિ ગોવિન્દ દામોદર માધવેતિ ॥ ૧૯॥

ક્રીડાપરં ભોજનમજ્જનાર્થં હિતૈષિણી સ્ત્રી તનુજં યશોદા ।
આજૂહવત્ પ્રેમપરિપ્લુતાક્ષી ગોવિન્દ દામોદર માધવેતિ ॥ ૨૦॥

સુખં શયાનં નિલયે ચ વિષ્ણું દેવર્ષિમુખ્યા મુનયઃ પ્રપન્નાઃ ।
તેનાચ્યુતે તન્મયતાં વ્રજન્તિ ગોવિન્દ દામોદર માધવેતિ ॥ ૨૧॥

વિહાય નિદ્રામરુણોદયે ચ વિધાય કૃત્યાનિ ચ વિપ્રમુખ્યાઃ ।
વેદાવસાને પ્રપઠન્તિ નિત્યં ગોવિન્દ દામોદર માધવેતિ ॥ ૨૨॥

વૃન્દાવને ગોપગણાશ્ચ ગોપ્યો વિલોક્ય ગોવિન્દવિયોગખિન્નામ્ ।
રાધાં જગુઃ સાશ્રુવિલોચનાભ્યાં ગોવિન્દ દામોદર માધવેતિ ॥ ૨૩॥

પ્રભાતસઞ્ચારગતા નુ ગાવસ્તદ્રક્ષણાર્થં  તનયં યશોદા ।
પ્રાબોધયત્ પાણિતલેન મન્દં ગોવિન્દ દામોદર માધવેતિ ॥ ૨૪॥

પ્રવાલશોભા ઇવ દીર્ઘકેશા વાતામ્બુપર્ણાશનપૂતદેહાઃ ।
મૂલે તરૂણાં મુનયઃ પઠન્તિ ગોવિન્દ દામોદર માધવેતિ ॥ ૨૫॥

એવં બ્રુવાણા વિરહાતુરા ભૃશં વ્રજસ્ત્રિયઃ કૃષ્ણવિષક્તમાનસાઃ ।
વિસૃજ્ય લજ્જાં રુરુદુઃ સ્મ સુસ્વરં ગોવિન્દ દામોદર માધવેતિ ॥ ૨૬॥

ગોપી કદાચિન્મણિપઞ્જરસ્થં શુકં વચો વાચયિતું પ્રવૃત્તા ।
આનન્દકન્દ વ્રજચન્દ્ર કૃષ્ણ ગોવિન્દ દામોદર માધવેતિ ॥ ૨૭॥

ગોવત્સબાલૈઃ શિશુકાકપક્ષં બધ્નન્તમમ્ભોજદલાયતાક્ષમ્ ।
ઉવાચ માતા ચિબુકં ગૃહીત્વા ગોવિન્દ દામોદર માધવેતિ ॥ ૨૮॥

પ્રભાતકાલે વરવલ્લવૌઘા ગોરક્ષણાર્થં ધૃતવેત્રદણ્ડાઃ ।
આકારયામાસુરનન્તમાદ્યં ગોવિન્દ દામોદર માધવેતિ ॥ ૨૯॥

જલાશયે કાલિયમર્દનાય યદા કદમ્બાદપતન્મુરારિઃ ।
ગોપાઙ્ગનાશ્ચુક્રુશુરેત્ય ગોપા ગોવિન્દ દામોદર માધવેતિ ॥ ૩૦॥

અક્રૂરમાસાદ્ય યદા મુકુન્દશ્ચાપોત્સવાર્થં મથુરાં પ્રવિષ્ટઃ ।
તદા સ પૌરૈર્જયસીત્યભાષિ ગોવિન્દ દામોદર માધવેતિ ॥ ૩૧॥

કંસસ્ય દૂતેન યદૈવ નીતૌ વૃન્દાવનાન્તાદ્ વસુદેવસૂનૂ । (સૂનૌ)
રુરોદ ગોપી ભવનસ્ય મધ્યે ગોવિન્દ દામોદર માધવેતિ ॥ ૩૨॥

સરોવરે કાલિયનાગબદ્ધં શિશું યશોદાતનયં નિશમ્ય ।
ચક્રુર્લુઠન્ત્યઃ પથિ ગોપબાલા ગોવિન્દ દામોદર માધવેતિ ॥ ૩૩॥

અક્રૂરયાને યદુવંશનાથં સઙ્ગચ્છમાનં મથુરાં નિરીક્ષ્ય ।
ઊચુર્વિયોગત્ કિલ ગોપબાલા ગોવિન્દ દામોદર માધવેતિ ॥ ૩૪॥

ચક્રન્દ ગોપી નલિનીવનાન્તે કૃષ્ણેન હીના કુસુમે શયાના ।
પ્રફુલ્લનીલોત્પલલોચનાભ્યાં ગોવિન્દ દામોદર માધવેતિ ॥ ૩૫॥

માતાપિતૃભ્યાં પરિવાર્યમાણા ગેહં પ્રવિષ્ટા વિલલાપ ગોપી ।
આગત્ય માં પાલય વિશ્વનાથ ગોવિન્દ દામોદર માધવેતિ ॥ ૩૬॥

વૃન્દાવનસ્થં હરિમાશુ બુદ્ધ્વા ગોપી ગતા કાપિ વનં નિશાયામ્ ।
તત્રાપ્યદૃષ્ટ્વાઽતિભયાદવોચદ્ ગોવિન્દ દામોદર માધવેતિ ॥ ૩૭॥

સુખં શયાના નિલયે નિજેઽપિ નામાનિ વિષ્ણોઃ પ્રવદન્તિ મર્ત્યાઃ ।
તે નિશ્ચિતં તન્મયતાં વ્રજન્તિ ગોવિન્દ દામોદર માધવેતિ ॥ ૩૮॥

સા નીરજાક્ષીમવલોક્ય રાધાં રુરોદ ગોવિન્દવિયોગખિન્નામ્ ।

સખી પ્રફુલ્લોત્પલલોચનાભ્યાં ગોવિન્દ દામોદર માધવેતિ ॥ ૩૯॥

જિહ્વે રસજ્ઞે મધુરપ્રિયા ત્વં સત્યં હિતં ત્વાં પરમં વદામિ ।
આવર્ણયેથા મધુરાક્ષરાણિ ગોવિન્દ દામોદર માધવેતિ ॥ ૪૦॥

આત્યન્તિકવ્યાધિહરં જનાનાં ચિકિત્સકં વેદવિદો વદન્તિ ।
સંસારતાપત્રયનાશબીજં ગોવિન્દ દામોદર માધવેતિ ॥ ૪૧॥

તાતાજ્ઞયા ગચ્છતિ રામચન્દ્રે સલક્ષ્મણેઽરણ્યચયે સસીતે ।
ચક્રન્દ રામસ્ય નિજા જનિત્રી ગોવિન્દ દામોદર માધવેતિ ॥ ૪૨॥

એકાકિની દણ્ડકકાનનાન્તાત્ સા નીયમાના દશકન્ધરેણ ।
સીતા તદાક્રન્દદનન્યનાથા ગોવિન્દ દામોદર માધવેતિ ॥ ૪૩॥

રામાદ્વિયુક્તા જનકાત્મજા સા વિચિન્તયન્તી હૃદિ રામરૂપમ્ ।
રુરોદ સીતા રઘુનાથ પાહિ ગોવિન્દ દામોદર માધવેતિ ॥ ૪૪॥

પ્રસીદ વિષ્ણો રઘુવંશનાથ સુરાસુરાણાં સુખદુઃખહેતો ।
રુરોદ સીતા તુ સમુદ્રમધ્યે ગોવિન્દ દામોદર માધવેતિ ॥ ૪૫॥

અન્તર્જલે ગ્રાહગૃહીતપાદો વિસૃષ્ટવિક્લિષ્ટસમસ્તબન્ધુઃ ।
તદા ગજેન્દ્રો નિતરાં જગાદ ગોવિન્દ દામોદર માધવેતિ ॥ ૪૬॥

હંસધ્વજઃ શઙ્ખયુતો દદર્શ પુત્રં કટાહે પ્રતપન્તમેનમ્ ।
પુણ્યાનિ નામાનિ હરેર્જપન્તં ગોવિન્દ દામોદર માધવેતિ ॥ ૪૭॥

દુર્વાસસો વાક્યમુપેત્ય કૃષ્ણા સા ચાબ્રવીત્ કાનનવાસિનીશમ્ ।
અન્તઃ પ્રવિષ્ટં મનસા જુહાવ ગોવિન્દ દામોદર માધવેતિ ॥ ૪૮॥

ધ્યેયઃ સદા યોગિભિરપ્રમેયઃ ચિન્તાહરશ્ચિન્તિતપારિજાતઃ ।
કસ્તૂરિકાકલ્પિતનીલવર્ણો ગોવિન્દ દામોદર માધવેતિ ॥ ૪૯॥

સંસારકૂપે પતિતોઽત્યગાધે મોહાન્ધપૂર્ણે વિષયાભિતપ્તે ।
કરાવલમ્બં મમ દેહિ વિષ્ણો ગોવિન્દ દામોદર માધવેતિ ॥ ૫૦॥

ભજસ્વ મન્ત્રં ભવબન્ધમુક્ત્યૈ જિહ્વે રસજ્ઞે સુલભં મનોજ્ઞમ્ ।
દ્વૈપાયનાદ્યૈર્મુનિભિઃ પ્રજપ્તં ગોવિન્દ દામોદર માધવેતિ ॥ ૫૧॥

ત્વામેવ યાચે મમ દેહિ જિહ્વે સમાગતે દણ્ડધરે કૃતાન્તે ।
વક્તવ્યમેવં મધુરં સુભક્ત્યા ગોવિન્દ દામોદર માધવેતિ ॥ ૫૨॥

ગોપાલ વંશીધર રૂપસિન્ધો લોકેશ નારાયણ દીનબન્ધો ।
ઉચ્ચસ્વરૈસ્ત્વં વદ સર્વદૈવ ગોવિન્દ દામોદર માધવેતિ ॥ ૫૩॥

જિહ્વે સદૈવં ભજ સુન્દરાણિ નામાનિ કૃષ્ણસ્ય મનોહરાણિ ।
સમસ્તભક્તાર્તિવિનાશનાનિ ગોવિન્દ દામોદર માધવેતિ ॥ ૫૪॥

ગોવિન્દ ગોવિન્દ હરે મુરારે ગોવિન્દ ગોવિન્દ મુકુન્દ કૃષ્ણ ।
ગોવિન્દ ગોવિન્દ રથાઙ્ગપાણે ગોવિન્દ દામોદર માધવેતિ ॥ ૫૫॥

સુખાવસાને ત્વિદમેવ સારં દુઃખાવસાને ત્વિદમેવ ગેયમ્ ।
દેહાવસાને ત્વિદમેવ જાપ્યં ગોવિન્દ દામોદર માધવેતિ ॥ ૫૬॥

દુર્વારવાક્યં પરિગૃહ્ય કૃષ્ણા મૃગીવ ભીતા તુ કથં કથઞ્ચિત્ ।
સભાં પ્રવિષ્ટા મનસા જુહાવ ગોવિન્દ દામોદર માધવેતિ ॥ ૫૭॥

શ્રીકૃષ્ણ રાધાવર ગોકુલેશ ગોપાલ ગોવર્ધન નાથ વિષ્ણો ।
જિહ્વે પિબસ્વામૃતમેતદેવ ગોવિન્દ દામોદર માધવેતિ ॥ ૫૮॥

શ્રીનાથ વિશ્વેશ્વર વિશ્વમૂર્તે શ્રીદેવકીનન્દન દૈત્યશત્રો ।
જિહ્વે પિબસ્વામૃતમેતદેવ ગોવિન્દ દામોદર માધવેતિ ॥ ૫૯॥

ગોપીપતે કંસરિપો મુકુન્દ લક્ષ્મીપતે કેશવ વાસુદેવ ।
જિહ્વે પિબસ્વામૃતમેતદેવ ગોવિન્દ દામોદર માધવેતિ ॥ ૬૦॥

ગોપીજનાહ્લાદકર વ્રજેશ ગોચારણારણ્યકૃતપ્રવેશ ।
જિહ્વે પિબસ્વામૃતમેતદેવ ગોવિન્દ દામોદર માધવેતિ ॥ ૬૧॥

પ્રાણેશ વિશ્વમ્ભર કૈટભારે વૈકુણ્ઠ નારાયણ ચક્રપાણે ।
જિહ્વે પિબસ્વામૃતમેતદેવ ગોવિન્દ દામોદર માધવેતિ ॥ ૬૨॥

હરે મુરારે મધુસૂદનાદ્ય શ્રીરામ સીતાવર રાવણારે ।
જિહ્વે પિબસ્વામૃતમેતદેવ ગોવિન્દ દામોદર માધવેતિ ॥ ૬૩॥

શ્રીયાદવેન્દ્રાદ્રિધરામ્બુજાક્ષ ગોગોપગોપીસુખદાનદક્ષ ।
જિહ્વે પિબસ્વામૃતમેતદેવ ગોવિન્દ દામોદર માધવેતિ ॥ ૬૪॥

ધરાભરોત્તારણગોપવેષ વિહારલીલાકૃતબન્ધુશેષ ।
જિહ્વે પિબસ્વામૃતમેતદેવ ગોવિન્દ દામોદર માધવેતિ ॥ ૬૫॥

બકીબકાઘાસુરધેનુકારે કેશીતૃણાવર્તવિઘાતદક્ષ ।
જિહ્વે પિબસ્વામૃતમેતદેવ ગોવિન્દ દામોદર માધવેતિ ॥ ૬૬॥

શ્રીજાનકીજીવન રામચન્દ્ર નિશાચરારે ભરતાગ્રજેશ ।
જિહ્વે પિબસ્વામૃતમેતદેવ ગોવિન્દ દામોદર માધવેતિ ॥ ૬૭॥

નારાયણાનન્ત હરે નૃસિંહ પ્રહ્લાદબાધાહર હે કૃપાલો ।
જિહ્વે પિબસ્વામૃતમેતદેવ ગોવિન્દ દામોદર માધવેતિ ॥ ૬૮॥

લીલામનુષ્યાકૃતિરામરૂપ પ્રતાપદાસીકૃતસર્વભૂપ ।
જિહ્વે પિબસ્વામૃતમેતદેવ ગોવિન્દ દામોદર માધવેતિ ॥ ૬૯॥

શ્રીકૃષ્ણ ગોવિન્દ હરે મુરારે હે નાથ નારાયણ વાસુદેવ ।
જિહ્વે પિબસ્વામૃતમેતદેવ ગોવિન્દ દામોદર માધવેતિ ॥ ૭૦॥

વક્તું સમર્થોઽપિ ન વક્તિ કશ્ચિદહો જનાનાં વ્યસનાભિમુખ્યમ્ ।
જિહ્વે પિબસ્વામૃતમેતદેવ ગોવિન્દ દામોદર માધવેતિ ॥ ૭૧॥

ઇતિ શ્રીબિલ્વમઙ્ગલાચાર્યવિરચિતં શ્રીગોવિન્દદામોદરસ્તોત્રં સમ્પૂર્ણમ્ ।

શ્લોક ૪૨-૪૫ પાઠાન્તર
ગોવિન્દ દામોદર માધવેતિ
સ્થાનમે
હે રામ રઘુનન્દન રાઘવેતિ

Encoded by Damodar Godse dgodse at aracnet.net
Proofread by Damodar Godse. Nivedita R.

*shrIgovindadAmodarastotra*
pdf was typeset on October 12, 2021

Please send corrections to *sanskrit@cheerful.com*